"वीजं षट्कोणमध्ये स्फुरदनलपुरे तारगं दिक्षु
लक्ष्मीः
माया कन्दर्पभूमिस्तदनु रसपुटेष्वालिखेद्वीज-
षट्कम् ।"
इति तन्त्रसारः ॥

षट्चक्रं, क्ली, ( षण्णां चक्राणां समाहारः । ) शरीरस्थपद्माकारषट्प्रकारचक्रम् । यथा,—
"सप्तपद्मानि तत्रैव सन्ति लोका इव प्रभो ।
गुदे पृथ्वीसमं चक्रं हरिद्वर्णं चतुर्द्दलम् ॥
लिङ्गे तु षड्दलं चक्रं स्वाधिष्ठानमिति स्मृतम् ।
त्रिलोकवह्निनिलयं तप्तचामीकरप्रभम् ॥
नाभौ दशदलं चक्रं कुण्डलिन्या समन्वितम् ।
नीलाञ्जननिभं ब्रह्मस्थानं पूर्व्वकमन्दिरम् ॥
मणिपूराभिधं स्वच्छं जलस्थानं प्रकीर्त्तितम् ।
उद्यदादित्यसंकाशं हृदि चक्रमनाहतम् ॥
कुम्भकाख्यं द्वादशारं वैष्णवं वायुमन्दिरम् ।
कण्ठे विशुद्धशरणं षोड़शारं पुरोदयम् ॥
शाम्भवीवरचक्राख्यं चन्द्रबिन्दुविभूषितम् ।
षष्ठमाज्ञालयं चक्रं द्विदलं श्वेतमुत्तमम् ॥
राधाचक्रमिति ख्यातं मनःस्थानं प्रकीर्त्तितम् ।
सहस्रदलमेकार्णं परमात्मप्रकाशकम् ॥
नित्यज्ञानमयं सत्यं सहस्रादित्यसन्निभम् ।
षट् चक्राणीह भेद्यानि नैतज्ज्ञेयं कथञ्चन ॥"
इति पाद्मे स्वर्गखण्डे २७ अध्यायः ॥*॥
अन्यच्च ।
"तत्त्वस्वरूपमेकं तत् षट्चक्रं प्रतिलक्षयेत् ।
षट्चक्रेऽपि महामायां क्षणं ध्यात्वा प्रयत्नतः ॥
लक्षयेन्मूलमन्त्रेण आदिषोड़शचक्रकम् ।
आदिषोड़शचक्रस्थां साधकानन्दकारिणीम् ॥
चिन्तयन् साधको देवीं जपकर्म्म समारभेत् ।
भ्रुवोरुपरि नाड़ीनां त्रयाणां प्रान्त उच्यते ।
तत्प्रान्तं त्रिपथस्थानं षट्कोणं चतुरङ्गुलम् ॥
रक्तवर्णन्तु योगज्ञैराज्ञाचक्रमितीरितम् ॥
कण्ठे त्रयाणां नाड़ीनां वेष्टनं विद्यते नृणाम् ।
सुषुम्नेड़ापिङ्गलानां षट्कोणं तत् षड़ङ्गुलम् ॥
तत् षट्चक्रमिति प्रोक्तं शुक्लं कण्ठस्य मध्य-
गम् ।
त्रयाणामथ नाड़ीनां हृदये चैकता भवेत् ॥
तत्स्थानं षोड़शास्रं स्यात् सप्ताङ्गुलप्रमाणतः ।
तत् पीतमुक्तं योगज्ञैरादिषोड़शचक्रकम् ॥
ध्यानानामथ मन्त्राणां चिन्तनस्य जपस्य च ।
यस्मादाद्यञ्च हृदयं तस्मादादीति गद्यते ॥"
इति कालिकापुराणे ५४ अध्यायः ॥*॥
अपरञ्च ।
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे कामबीजन्तु क-ल-शान्तीन्दुनादकम् ।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥
तद्बाह्ये हेमवर्णाभं व-स-वर्णचतुर्द्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
वादिलान्तषड़्वर्णेन युक्ताधिष्ठानसंज्ञकम् ॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥
तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ।
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते ॥
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।
शिवेनाधिष्ठितं पद्मं विश्वलोकैककारणम् ॥
तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् ॥
तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ॥
तेनाहताख्यं पद्मं तत् मुनिभिः परिकीर्त्त्यते ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥
तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोड़शपङ्कजम् ।
स्वरैः षोड़शकैर्युक्तं धूम्रवर्णं महत्प्रभम् ॥
विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातं आकाशाख्यं महत् परम्
आज्ञाचक्रं तदूर्द्ध्वे तु आत्मनाधिष्ठितं परम् ।
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ॥
कैलासाख्यं तदूर्द्ध्वे तु बोधनीन्तु तदूर्द्ध्वतः ।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ॥
सहस्राराम्बुजं बिन्दुस्थानं तदूर्द्ध्वमीरितम् ।
इत्येतत् कथितं सर्व्वं योगमार्गमनुत्तमम् ॥"
इति तन्त्रसारः ॥

षट्चरणः, पुं, ( षट् चरणा यस्य । ) भ्रमरः । इति हलायुधः ॥ ( यथा, आर्य्यासप्तशत्याम् । ५८७ ।
"षट्चरणकीटजुष्टं परागघुणपूर्णमायुधं
त्यक्ता ।
त्वां मुष्टिमेयमध्यामधुना शक्तिं स्मरो
वहति ॥")
यूका । इति राजनिर्घण्टः ॥ षट्पादश्च ॥

षट्टः, क निकेतने । हिंसे । दाने । बले । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०वासे बले च अक०-हिंसे दाने च सक०-सेट् ।) मूर्द्धन्यादिष्टवर्गान्तः । क, षट्टयति लोकः । निवसति हन्ति बली स्यात् ददाति वा इत्यर्थः । इति दुर्गादासः ॥

षट्तिली,[न्]त्रि, (उद्वर्त्तनादिभेदेन षट्प्रकारास्तिलाः सन्त्यस्येति । षट्तिल+इनिः ।)जन्मतिथ्यादौ तिलकरणकषट्कर्म्मकारी । यथा,—
"तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥"
इति तिथ्यादितत्त्वम् ॥

षट्त्रिंशत्, स्त्री, (षड़धिका त्रिंशत् । मध्यपदलोपि समासः ।) संख्याविशेषः । छत्रिश इति भाषा । यथा, आह्निकचिन्तामणौ ।
"आसनाभ्यञ्जने तद्वदुद्वर्त्तनविरूक्षणे ।
सम्मार्जनं सर्पिरादिस्नपनावाहने तथा ॥
पाद्यार्घ्याचमनीयञ्च स्नानीयमधुपर्क्कके ।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके ॥
अलङ्कारौ गन्धपुष्पधूपदीपौ तथैव च ।
ताम्बूलादिकनैवेद्यं पुष्पमालां तथैव च ॥
अनुलेपश्च शय्या च चामरव्यजनं तथा ।
आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम् ॥
गीतवाद्ये च दानानि स्तुतिहोमप्रदक्षिणम् ।
दन्तकाष्ठप्रदानञ्च ततो देवविसर्ज्जनम् ॥
उपचारा इमे ज्ञेयाः षट्त्रिंशत् सुरपूजने ॥"
इत्येकादशीतत्त्वम् ॥

षट्त्रिंशन्मतं, क्ली, (षट्त्रिंशतस्तत्संख्यकधर्म्मशास्त्रकारिणां मुनीनां मतम् ।) षड़धिकत्रिंशत्संख्यकधर्म्मशास्त्रप्रयोजकमुनीनामभिप्रायः । यथा । तथा च षट्त्रिंशन्मतम् । इति तिथिस्वरूपकथने तिथ्यादितत्त्वम् । तेषां नामानि यथा,—
"मनुर्विष्णुर्यमो दक्षः अङ्गिरोऽत्रिबृहस्पती ।
आपस्तम्बश्चोशना च कात्यायनपराशरौ ॥
वशिष्ठव्याससंवर्त्तौ हारीतगौतमावपि ।
प्रचेताः शङ्खलिखितौ याज्ञवल्क्यश्च काश्यपः ॥
शातातपो लोमशश्च जमदग्निः प्रजापतिः ।
विश्वामित्रपैठीनसी बौधायनपितामहौ ॥
छागलेयश्च जावालो मरीचिश्च्यवनो भृगुः ।
ऋष्यशृङ्गो नारदश्च षट्त्रिंशत् स्मृति-
कारकाः ॥
एतेषान्तु मतं यत्तु षट्त्रिंशन्मतमुच्यते ॥"
इति शङ्खलिखितौ ॥

षट्पदः पुं, (षट् पदानि यस्य । ) भ्रमरः । इत्यमरः ॥ (यथा, रघुः । ६ । ६९ ।
"न हि प्रफुल्लं सहकारमेत्य
वृक्षान्तरं काङ्क्षति षट्पदाली ॥")
तच्छकुनानि यथा,—
"ये षट्पदाद्याः शकुनानि तेषामाश्चर्य्यरूपाणि निरूपयामः ।
श्रयेत वामो यदि मञ्जु गुञ्जन्
पश्येत वा वामदिशं प्रसर्पन् ।
आस्वादयेद्वा कुसुमं प्रशस्तं
भृङ्गस्तदा स्यात् सुमहान् प्रमोदः ।
अत्रापरे सन्ति च षट्पदा ये
यात्रासु ते वामगताः प्रशस्ताः ॥"
इति वसन्तराजशाकुने षट्पदादयः १५ वर्गः ॥*
यूका । इति राजनिर्घण्टः ॥ षट्चरणे, त्रि ॥ (षट्पदविशिष्टे च त्रि । यथा, महाभारते । १४ । ५ । १६ ।
"पुरञ्च ते सुगुप्तं स्यात् दृढ़प्राकारतोरणम् ।
अट्टाट्टालकसंवाधं षट्पदं सर्व्वतोदिशम् ॥")

षट्पदप्रियः, पुं, (षट्पदानां भ्रमराणां प्रियः ।) नागकेशरवृक्षः । इति शब्दमाला ॥

षट्पदातिथिः, पुं, (षट्पदः अतिथिरिव यत्र । आम्रवृक्षः । इति त्रिकाण्डशेषः ॥

षट्पदानन्दवर्द्धनः, पुं, (षट्पदानामानन्दं वर्द्धयतीति । वृध+ल्युः ।) किंकिरातवृक्षः । इति राजनिर्घण्टः ॥

षट्पदी, स्त्री, ( षट्पदानि यस्याः । ङीष् । ) यूका । इति हेमचन्द्रः ॥ भ्रमरपत्नी च ॥